# Shri Bala Bahyapuja Vidhi

# શ્રીબાલાબાહ્યપૂજાવિધિઃ

## Document Information

Text title : bAlAbAhyapUjAvidhiH

File name : bAlAbAhyapUjAvidhiH.itx

Category : devii, dashamahAvidyA, devI, pUjA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીબાલાબાહ્યપૂજાવિધિઃ

આત્મપૂજા
મૂલેન પ્રાણાયામઃ ।
કુણ્ડલિણીં ધ્યાત્વા બ્રહ્મરન્ધ્રે શિવશક્તિસંયોગં કુર્યાત્ ।

પીઠપૂજા - ૪
મહામણ્ડૂકાય નમઃ । કાલાગ્નિરુદ્રાય નમઃ । મૂલપ્રકૃત્યૈ નમઃ ।
આધારશક્ત્યૈ નમઃ । આદિકૂર્માય નમઃ । અનન્તાય નમઃ ।
આદિવરાહાય નમઃ । પૃથિવ્યૈ નમઃ । સુધાર્ણવાય નમઃ ।
રત્નદ્વીપાય નમઃ । નન્દનોદ્યાનાય નમઃ । કલ્પકવૃક્ષેભ્યો નમઃ ।
પ્રભાયૈ નમઃ । માયાયૈ નમઃ । દુર્ગાયૈ નમઃ ।
રત્નદ્વીપાય નમઃ (repetition) ।
ચિન્તામણિગૃહાય નમઃ । નવરત્નપ્રાકારાય નમઃ ।
હ્રીં જ્ઞાનતત્ત્વાત્મને નમઃ ।
હ્રીં માયાતત્ત્વાત્મને નમઃ । હ્રીં વિદ્યાતત્ત્વાત્મને નમઃ ।
કામકોટિપીઠાય નમઃ । જાલન્ધરપીઠાય નમઃ । ઓડ્યાણપીઠાય નમઃ ।
યં રં લં વં શં ષં સં હં ળં અષ્ટાદશપીઠેભ્યો નમઃ ।
તમસે નમઃ । રજસે નમઃ । સત્ત્વાય નમઃ । માણિક્યમણ્ડપાય નમઃ ।
સહસ્રસ્તમ્ભમણ્ડપાય નમઃ । અમૃતવાપિકાયૈ નમઃ ।
આનન્દવાપિકાયૈ નમઃ । વિમર્શવાપિકાયૈ નમઃ । બાલાતપોદ્ગારાય નમઃ ।
ચન્દ્રિકોદ્ગારાય નમઃ । મહાશૃઙ્ગારપરિખાયૈ નમઃ ।
મહાપદ્માટવ્યૈ નમઃ । પ્રકૃતિમયપત્રેભ્યો નમઃ ।
વિકૃતિમયકેસરેભ્યો નમઃ । ચિન્તામણિગૃહાન્તરાલાય નમઃ ।
પુર્વામ્નાયાય નમઃ । પૂર્વદ્વારાય નમઃ । દક્ષિણામ્નાયાય નમઃ ।
દક્ષિણદ્વારાય નમઃ । પશ્ચિમામ્નાયાય નમઃ । ષશ્ચિમદ્વારાય નમઃ ।
ઉત્તરામ્નાયાય નમઃ । ઉત્તરદ્વારાય નમઃ । રત્નદ્વીપવલયાય નમઃ ।
મણિમયમહાસિંહાસનાય નમઃ । બ્રહ્મમયૈકમઞ્ચપાદાય નમઃ ।

વિષ્ણુમયૈકમઞ્ચપાદાય નમઃ । રુદ્રમયૈકમઞ્ચપાદાય નમઃ ।
ઈશ્વરમયૈકમઞ્ચપાદાય નમઃ । સદાશિવમઞ્જફલકાય નમઃ ।
હંસતૂલતલ્પાય નમઃ । હંસતૂલમહોપધાનાય નમઃ ।
કૌસુમ્ભાસ્તરણાય નમઃ । મહામાયાયવનિકાયૈ નમઃ ।
કામેશ્વરાઙ્કમધ્યસ્થકામેશ્વર્યઙ્કાય નમઃ ।)

આસનં
૧૦ કનકમયવિતર્દિસ્થાપિતે તૂલિકાઢ્યે
વિવિધકુસુમકીર્ણે કોટિબાલાર્કવર્ણે ।
ભગવતિ રમણીયે રત્નસિંહાસનેઽસ્મિન્
ઉપવિશ પદયુગ્મં હેમપીઠે નિધાય ॥

પાદ્યં
૧૦ દૂર્વયા સરસિજાન્વિતવિષ્ણુક્રાન્તયા ચ સહિતં કુસુમાઢ્યમ્ ।
પદ્મયુગ્મસદૃશે પદયુગ્મે પાદ્યમેતદુરરીકુરુ માતઃ ॥

અર્ઘ્યં
૧૦ ગન્ધપુષ્પયવસર્ષપદૂર્વાસંયુતં તિલકુશાક્ષતમિશ્રમ્ ।
હેમપાત્ર નિહિતં સહ રત્નૈઃ અર્ઘ્યમેતદુરરીકુરુ માતઃ ॥

આચમનં
૧૦ જલજદ્યુતિના કરેણ જાતીફલતક્કોલલવઙ્ગગન્ધમિશ્રૈઃ ।
અમૃતૈરમૃતૈરિવાતિશીતૈઃ ભગવત્યાચમનં વિધીયતામ્ ॥

મધુપર્કઃ
૧૦ નિહિતં કનકસ્ય સમ્પુટે પિહિતં રત્નપિધાનકેન યત્ ।
તદિદં જગદમ્બ તેઽર્પિતં મધુપર્કં જનનિ પ્રગૃહ્યતામ્ ॥

સ્નાનં
૧૦ દધિદુગ્ધઘૃતૈઃ સમાક્ષિકૈઃ સિતયા શર્કરયા સમન્વિતૈઃ ।
સ્નપયામિ તવાહમાદરાજ્જનનિ ત્વાં પુનરુષ્ણવારિભિઃ ॥

એલોશીરસુવાસિતૈઃ સુકુસુમૈર્ગઙ્ગાદિતીર્થોદકૈઃ
માણીક્યામલમૌક્તિકામૃતરસૈઃ સ્વચ્છારિઃ સુવર્ણોદકૈઃ ।
મન્ત્રાન્વૈદિકતાન્ત્રિકાન્પરિપઠન્ સાનન્દમત્યાદરાત્
સ્નાનં તે પરિકલ્પયામિ જનનિ સ્નેહાત્ત્વમઙ્ગીકુરુ ॥

(ગણપત્યથર્વશીર્ષ શ્રીરુદ્ર દુર્ગા પુરુષ
 શ્રીસૂક્તાદિભિઃ અભિષિઞ્ચેત્ ।)
 સ્નાનાનન્તરં આચમનીયં સમર્પયામિ ।
 વસ્ત્રધારણમ્ - કેશપ્રસાધનં ચ ।
 ૧૦ બાલાર્કદ્યુતિ દાડિમીયકુસુમપ્રસ્પર્ધિ સર્વોત્તમં
માતસ્ત્વં પરિધેહિ દિવ્યવસનં ભક્ત્યા મયા કલ્પિતમ્ ।
મુક્તાભિર્ગ્રથિતં સુકઞ્ચુકમિદં સ્વીકૃત્ય પીતપ્રભં
તપ્તસ્વર્ણસમાનવર્ણમતુલં પ્રાવર્ણમઙ્ગીકુરુ ॥

 ૧૦ બહુભિરગરુધૂપૈઃ સાદરં ધૂપયિત્વા
ભગવતિ તવ કેશાન્કઙ્કતૈર્માર્જયિત્વા ।
સુરભિભિરરવિન્દૈશ્ચમ્પકૈશ્ચાર્ચયિત્વા
ઝટિતિ કનકસૂત્રૈર્જૂટયન્વેષ્ટયામિ ॥

આભરણભૂષણં
(૧૦) મઞ્જીરે પાયોર્નિધાય રુચિરાં વિન્યસ્ય કાઞ્ચીં કટૌ
મુક્તાહારમુરોજયોરનુપમાં નક્ષત્રમાલાં ગલે ।
કેયૂરાણિ ભુજેષુ રત્નવલયશ્રેણીં કરેષુ ક્રમાત્
તાટઙ્કે તવ કર્ણયોર્વિનદધે શીર્ષે ચ ચૂડામણિમ્ ॥

ગન્ધકુઙ્કુમાક્ષતધારણં
(૧૦) માતઃ ફાલતલે તાવતિવિમલે કાશ્મીરકસ્તૂરિકા
કર્પૂરાગરુભિઃ કરોમિ તિલકં દેહેઽઙ્ગરાગં તતઃ ।
વક્ષોજાદિષુ યક્ષકર્દમરસં સિક્ત્વા ચ પુષ્પદ્રવં
તાટઙ્કે તવ કર્ણયોર્વિનિદધે શીર્ષે ચ ચૂડામણિમ્ ॥

(૧૦) રત્નાક્ષતૈસ્ત્વાં પરિપૂજયામિ મુક્તાફલૈર્વા રુચિરૈરવિદ્ધૈઃ ।
અખણ્ડિતૈર્દેવિ યવાદિભિર્વા કાશ્મીરપઙ્કાઙ્કિતતણ્ડુલૈર્વા ॥

(૧૦) સીમન્તે તે ભગવતિ મયા સાદરં ન્યસ્તમેતત્
સિન્દૂરં મે હૃદયકમલે હર્ષવર્ષં તનોતિ ।
બાલાદિત્યદ્યુતિરિવ સદા લોહિતા યસ્ય કાન્તિઃ
અન્તર્ધ્વાન્તં હરતિ સકલં ચેતસા ચિન્તયૈવ ॥

પુષ્પાલઙ્કરણં
 ૧૦ મન્દારકુન્દકરવીરલવઙ્ગપુષ્પૈઃ

ત્વાં દેવિ સન્તતમહં પરિપૂજયામિ ।
જાતીજપાવકુલચમ્પકકેતકાદિ -
નાનાવિધાનિ કુસુમાનિ ચ તેઽર્પયામિ ॥

(ગુરુમણ્ડલપૂજા)
(શ્રીનાથાદિ ગુરુત્રયં) ઐં હ્રીં શ્રીં ઐં ક્લીં સૌઃ હંસઃ શિવઃ
સોઽહં સ્વરૂપનિરૂપણહેતવે શ્રીગુરવે નમઃ ।
ઐં હ્રીં શ્રીં ઐં ક્લીં સૌઃ સોઽહં હંસઃ શિવઃ ।
સ્વચ્છપ્રકાશવિમર્શહેતવે શ્રીપરમગુરવે નમઃ ।

(ગણપતિં) ૐ શ્રીં હ્રીં ક્લીં ગ્લૌઃ ગં ગણપતયે વર વરદ
સર્વજનં મે વશમાનય સ્વાહા । મહાગણપતયે નમઃ ।
(પીઠત્રયં) ૐ ઐં હ્રીં । શ્રીં ક્લીં સૌઃ કામગિરિપીઠે બ્રહ્મશક્ત્યૈ
સરસ્વત્યૈ નમઃ ।
ૐ ઐં હ્રીં । હ્રીં શ્રીં સૌઃ ક્લીં ઐં પૂર્ણગિરિપીઠે વિષ્ણુશક્ત્યૈ
મહાલક્ષ્મ્યૈ નમઃ ।
ૐ ઐં ક્લીં સૌઃ શ્રીં હ્રીં ઐં જાલન્ધરપીઠે રુદ્રશક્ત્યૈ
શ્રીમહાગૌર્યૈ નમઃ ।

(ભૈરવં) -ઓં હ્રીં શ્રીં ફટ્ ફં ફાં ફિં ફીં ભૈરવાય નમઃ ।
(સિદ્ધૌઘં) -ઓં હ્રીં શ્રીં સૌઃ આં સિદ્ધૌઘાય નમઃ ।
(વટુકત્રયં) ૐ હ્રીં શ્રીં હું ફટ્ વટુકત્રયાય નમઃ ।
(પદયુગં) હસકલહ્રીં હસકહલહ્રીં સકલહ્રીં પદયુગાય નમઃ ।
(દૂતીક્રમં) ૐ ઐં હ્રીં શ્રીં અં આં સૌઃ શ્રીં હ્રીં સૌઃ નવદૂતીભ્યો નમઃ ।
(મણ્ડલં) હ્રીં શ્રીં ઐં અગ્નિમણ્ડલાય નમઃ ।
હ્રીં શ્રીં ક્લીં સૂર્યમણ્ડલાય નમઃ । હ્રીં શ્રીં સૌઃ ચન્દ્રમણ્ડલાય નમઃ ।
(વીરાન્દ્વ્યષ્ટ) ઐં હ્રીં શ્રીં ક્લીં હ્રીં શ્રીં ફટ્ ફાં ફેં
ષોડશવીરભૈરવેભ્યો નમઃ ।
(ચતુષ્કષષ્ટિ) ઐં હ્રીં શ્રીં ક્લીં હ્રીં શ્રીં સૌઃ હ્રીં શ્રીં
ચતુષ્ષષ્ટિસિદ્ધેભ્યો નમઃ ।
(નવકં) દ્રાં દ્રીં ક્લીં બ્લૂં સઃ ક્રોં હ્ સ્ખ્ ફ્રેં હ્સૌઃ ઐં
નવમુદ્રાભ્યો નમઃ ।
(વીરાવલીપઞ્ચકમ્) ઐં હ્રીં ઐં ક્લીં સૌઃ પઞ્ચવીરાવલીભ્યો નમઃ ।
(શ્રીમન્માલિની) ઐં હ્રીં શ્રીં અં આં ઇત્યાદિ લં ક્ષં શ્રીં હ્રીં ઐં

માલિન્યમ્બાયૈ નમઃ ।
(મન્ત્રરાજઃ) ઐં હ્રીં શ્રીં હ્રીં હ્રીં હું ફટ્ મન્ત્રરાજાય નમઃ ।)
આવરણપૂજા૧ ॥

શ્રીગુરુભ્યો ૐ નમઃ । ૐ શ્રીગુરુશ્રીપાદુકાં પૂજયામિ નમઃ । (દેવ્યાઃ પુરઃ)।
ૐ ગં ગણપતયે નમઃ । શ્રીગણપતિશ્રીપાદુકાં પૂજયામિ નમઃ । (પુરતઃ)।
ૐ દું દુર્ગાયૈ નમઃ । શ્રીદિર્ગાપાદુકાં પૂજયામિ નમઃ (દક્ષિણે)।
ૐ ક્ષં ક્ષેત્રપાલકાય નમઃ ।
શ્રીક્ષેત્રપાલશ્રીપાદુકાં પૂજયામિ નમઃ (પશ્ચાત્) ।
ૐ અં અભયઙ્કરાય નમઃ ।
શ્રી અભયઙ્કરશ્રીપાદુકાં પૂજયામિ નમઃ (વામે) ।
ૐ નમઃ કુલદેવતાયૈ । કુલદેવતા શ્રીપાદુકાં પૂજયામિ નમઃ (પુરતઃ) ।

૧. આવરણપૂજા દ્વેધા ક્રિયતે । ભૂપુરાદિ વિન્દ્વન્તં એકમ્ ।
યસ્ય ક્રમો અત્ર દીયતે । અન્યત્ । બિન્દ્વાદિ ભૂપુરાન્તમ્ ।
અસ્યૈવ વ્યુત્ક્રમેણ તત્સાધ્યતે । પ્રથમાવરણેત્યાદિ સઙ્ખ્યાસઙ્કેતે
ભેદઃ તત્ર । અન્યત્સમાનમ્ । તત્ર ષષ્ઠં પ્રથમં ભવતિ ।
પઞ્ચમં દ્વિતીયમિત્યાદિ ।

પ્રથમાવરણે ભૂપુરે (સર્વાશાપરિપૂરકે) (પ્રાગાદિક્રમેણ)
૧૦ સર્વાશાપરિપૂરકચક્રાય નમઃ । (પુષ્પાઞ્જલિઃ) (પુરતઃ)
૧૦ ઇન્દ્રશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અગ્નિશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ યમશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ નિરૃતિશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ વરુણશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ વાયુશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ કુબેરશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ઈશાન શક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ બાલામ્બા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ । (૩)
(બિન્દૌ) (મૂલેન ત્રિઃ સન્તર્પ્ય ધૂપદીપૌ નિવેદનં નીરાજનં)
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥

(ઇતિ સામાન્યાર્ઘ્યોદકેન દેવ્યા વામહસ્તે પૂજાં સમર્પ્ય)
૧૦ પ્રથમાવરણદેવતાસહિતાયૈ સર્વાશાપરિપૂરકચક્રસ્વામિન્યૈ
બાલામ્બાયૈ નમઃ । (ઇતિ યોનિમુદ્રયા પ્રણમેત્)
દ્વિતીયાવરણે - બહિરષ્ટદલે (સર્વસૌભાગ્યદાયકે)
(પ્રાગાદિક્રમેણ) (દલમધ્યે)
૧૦ સર્વસૌભાગ્યદાયકચક્રાય નમઃ । (પુષ્પાઞ્જલિઃ)
૧૦ અનઙ્ગકુસુમામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અનઙ્ગમેખલામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અનઙ્ગમદનામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અનઙ્ગમદનાતુરામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અનઙ્ગરેખામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અનઙ્ગવેગિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અનઙ્ગાઙ્કુશામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ
૧૦ અનઙ્ગમાલિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(દલાગ્રે) પ્રાગાદિક્રમેણ)
૧૦ વશિનીવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ કામેશ્વરીવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ મોદિનીવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ વિમલાવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ અરુણાવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ જયિનીવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ સર્વેશ્વરીવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ કૌલિનીવાગ્દેવતામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ બાલામ્બા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ । (૩) (બિન્દૌ)
(મૂલેન ત્રિઃ સન્તર્પ્ય ધૂપદીપૌ નિવેદનં નીરાજનમ્)
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં દ્વિતીયાવરણાર્ચનમ્ ॥

(ઇતિ સામાન્યાર્ઘ્યોદકેન દેવ્યા વામહસ્તે પૂજાં સમર્પ્ય)
૧૦ દ્વિતીયાવરણદેવતાસહિતાયૈ સર્વસૌભાગ્યદાયકચક્રસ્વામિન્યૈ
બાલામ્બાયૈ નમઃ ।
(ઇતિ યોનિમુદ્રયા પ્રણમેત્)

અન્તરષ્ટદલે તૃતીયાવરણમ્ (સર્વાર્થસાધકચક્રમ્)
(દલમધ્યે) (પ્રાગાદિક્રમેણ)
૧૦ સર્વાર્થસાધકચક્રાય નમઃ । (પુષ્પાઞ્જલિઃ)
૧૦ બ્રાહ્મ્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ માહેશ્વર્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ કૌમાર્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ વૈષ્ણવ્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ વારાહ્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ માહેન્દ્ર્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ચામુણ્ડામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ મહાલક્ષ્મ્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(દલાગ્રે) પ્રાગાદિક્રમેણ)
૧૦ અસિતાઙ્ગભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ રુરુભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ચણ્ડભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ક્રોધભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ઉન્મત્તભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ કપાલભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ભીષણભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ સંહારભૈરવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ બાલામ્બા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ । (બિન્દૌ)
(મૂલેન ત્રિઃ સન્તર્પ્ય ધૂપદીપૌ નિવેદનં નીરાજનં)
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભાક્ત્યા સમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥

(ઇતિ સામાન્યાર્ઘ્યોદકેન દેવ્યા વામહસ્તે પૂજાં સમર્પ્ય)
૧૦ તૃતીયાવરણદેવતા સહિતાયૈ સર્વાર્થસાધકચક્રસ્વામિન્યૈ
બાલામ્બાયૈ નમઃ । (ઇતિ યોનિમુદ્રયા પ્રણમેત્)

ષટ્કોણે ચતુર્થાવરણમ્ (સર્વરક્ષાકરમ્) (પ્રાગાદિક્રમેણ)
(૧૦) સર્વસિદ્ધિપ્રદચક્રાય નમઃ । (પુષ્પાઞ્જલિઃ ।)
(૧૦) સાકિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(૧૦) રાકિણ્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।

(૧૦) લાકિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(૧૦) કાકિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(૧૦) ડાકિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(૧૦) હાકિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(૧૦) યાકિન્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ । (મધ્યે)
(૧૦) બાલામ્બા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ । (૩) (બિન્દૌ)
(મૂલેન ત્રિઃ સન્તર્પ્ય ધૂપદીપૌ નિવેદનં નીરાજનં)
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં ચતુર્થાવરણાર્ચનમ્ ॥

(ઇતિ સામાન્યાર્ઘ્યોદકેન દેવ્યા વામહસ્તે પૂજાં સમર્પ્ય)
૧૦ ચતુર્થાવરણદેવતાસહિતાયૈ સર્વરક્ષાકરચક્રસ્વામિન્યૈ
બાલામ્બાયૈ નમઃ । (ઇતિ યોનિમુદ્રયા પ્રણમેત્)

ત્રિકોણે પઞ્ચમાવરણમ્ (સર્વસિદ્ધિપ્રદચક્રમ્)
૧૦ સર્વસિદ્ધિપ્રદચક્રાય નમઃ (પુષ્પાઞ્જલિઃ)
૧૦ રત્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ પ્રીત્યમ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ વિજયામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ બાલામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ । (૩) બિન્દૌ)
(મૂલેન ત્રિઃ સન્તર્પ્ય ધૂપદીપૌ નિવેદનં નીરાજનં)
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
(ઇતિ સામાન્યાર્ઘ્યોદકેન દેવ્યા વામહસ્તે પૂજાં સમર્પ્ય)
૧૦ પઞ્ચમાવરણદેવતાસહિતાયૈ સર્વસિદ્ધિપ્રદચક્રસ્વામિન્યૈ
બાલામ્બાયૈ નમઃ । (ઇતિ યોનિમુદ્રયા પ્રણમેત્)

બિન્દૌ સર્વાનન્દમયચક્રે ષષ્ઠાવરણમ્ (મધ્યત્રિકોણ - બહિર્ભાગે
આગ્નેયીનૈરૃતીવાયવી ઐશાનાદિ દિક્ષુ મધ્યે પરિતશ્ચ)
૧૦ ઐં હૃદયશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ક્લીં શિરઃશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ સૌઃ શિખાશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ઐં કવચશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ ક્લીં નેત્રશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૧૦ સૌઃ અસ્ત્રશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।

 ૧૦ શ્રી બાલામ્બા શ્રીપાદુકાં પૂજયામિ નમઃ ।
બિન્દોર્બહિઃ ત્રિકોણેષુ
 ૧૦ ૐ નમો ભગવતે દક્ષિણામૂર્તયે મહ્યં મેધાં પ્રજ્ઞાં પ્રયચ્છ
   સ્વાહા -
શ્રીમેધાદક્ષિણામૂર્તિશ્રીપાદુકાં પૂજયામિ નમઃ ।
 ૧૦ હંસઃ શિવઃ સોઽહં શ્રી ગુરુશ્રીપાદુકાં પૂજયામિ નમઃ ।
 ૧૦ સોઽહં હંસઃ શિવઃ શ્રીપરમગુરુ શ્રીપાદુકાં પૂજયામિ નમઃ ।
 ૧૦ હંસઃ શિવઃ સોઽહં હંસઃ શ્રીપરમેષ્ઠિગુરુ શ્રીપાદુકાં
   પૂજયામિ નમઃ ।
 ૧૦ સર્વાનન્દમયચક્રાય નમઃ (પુષ્પાઞ્જલિઃ)
 ૧૦ સર્વમન્ત્રેશ્વરી -સર્વચક્રેશ્વરી - સર્વજગદુત્પત્તિમાતૃકા
    સચક્રા સવાહના સાલઙ્કારા - સપરિવારા શ્રીમદ્બાલામ્બા
   શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
    (મૂલેન ત્રિઃ સન્તર્પ્ય ધૂપદીપૌ નિવેદનં નીરાજનં)
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં ષષ્ઠમાવરણાર્ચનમ્ ॥

(ઇતિ સામાન્યાર્ઘ્યોદકેન દેવ્યા વામહસ્તે પૂજાં સમર્પ્ય)
 ૧૦ ષષ્ઠાવરણદેવતાસહિતાયૈ સર્વાનન્દમયચક્રસ્વામિન્યૈ
    બાલામ્બાયૈ નમઃ । (ઇતિ યોનિમુદ્રયા પ્રણમેત્)

નવયોન્યાત્મકે યન્ત્રે આવરણપૂજા
હ્સૌઃ સદાશિવમઞ્ચાસનાય નમઃ । કામેશ્વરાઙ્કાય નમઃ ।
કામેશ્વરાઙ્કમધ્યસ્થકામેશ્વર્યઙ્કાય નમઃ । દેવ્યાસનાય નમઃ ।
બાલાં ધ્યાત્વા પ્રાણશક્તિં પ્રતિષ્ઠાપ્ય આવાહનાદિ પુષ્પાન્તાં પૂજાં
કુર્યાત્ શ્રીગુર્વભિન્નબાલાત્રિપુરસુન્દર્યાજ્ઞાં ગૃહ્ણીયાત્ ।

શ્રીગુરો દક્ષિણામૂર્તે ભક્તાનુગ્રહકારક ।
અનુજ્ઞાં દેહિ ભગવન્ શ્રીબાલાયજનાય મે ॥

સંવિન્મયે પરે દેવિ પરામૃતરસપ્રિયે ।
અનુજ્ઞાં દેહિ બાલે ત્વં પરિવારાર્ચનાય મે ॥

 ૧. પ્રથમાવરણાચનમ્ - (બિન્દુમધ્યે દેવી । દેવ્યા વામે)
 ૪ રત્યૈ નમઃ । રતિ શ્રીપાદુકાં પૂજયામિ નમઃ । (દેવ્યા દક્ષિણે)

૪ પ્રીત્યૈ નમઃ । પ્રીતિ શ્રીપાદુકાં પૂજયામિ નમઃ । (દેવ્યગ્રે)
મનો ભવાયૈ નમઃ । મનોભવા શ્રીપાદુકાં પૂજયામિ નમઃ ।
(પુષ્પાઞ્જલિં દત્વા)
૭. અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥

એતા દેવતાઃ પૂજિતાસ્તર્પિતાઃ સન્તુ ઇતિ પુષ્પાઞ્જલિં દત્વા
યોનિમુદ્રયા પ્રણમેત્ ।)

૨. દ્વિતીયાવરણાર્ચનમ્ । (મધ્યત્રિકોણે બહિર્ભાગે આગ્નેયી-નૈરૃતી-
વાયવી-ઐશાનીદિક્ષુ ક્રમેણ)
૪ આં સૌઃ ક્લીં ઐં હૃદયાય નમઃ હૃદયશક્તિ શ્રીપાદુકાં
પૂજયામિ નમઃ ।
૪ ઈં સૌઃ ક્લીં ઐં શિરઃશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૪ ઊં સૌઃ ક્લીં ઐં શિખાશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૪ ઐં સૌઃ ક્લીં ઐં કવચશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૪ ઔં સૌઃ ક્લીં ઐં નેત્રત્રયશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ । (મધ્યે)
૪ અઃ સૌઃ ક્લીં ઐં અસ્ત્રશક્તિ શ્રીપાદુકાં પૂજયામિ નમઃ ।
(દિક્ષુ પરિતઃ)।
(પુષ્પાઞ્જલિં દત્વા)
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં દ્વિતીયાવરણાર્ચનમ્ ॥

એતા દેવતાઃ પૂજિતાસ્તર્પિતા ભવન્તુ ઇતિ પુષ્પાઞ્જલિં દત્વા
યોનિમુદ્રયા પ્રણમેત્ ।

તૃતીયાવરણાર્ચનમ્ । (મધ્યત્રિકોણસ્ય બહિઃ પુર્વાદક્ષિણા-
પશ્ચિમોદીચીદિક્ષુ મધ્યે ચ ક્રમેણ)
૪ હ્રીં મનોભવાય નમઃ । મનોભવ શ્રીપાદુકાં૧ પૂજયામિ નમઃ ।
૪ ક્લીં મકરધ્વજાય નમઃ । મકરધ્વજ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૪ ઐં કન્દર્પાય નમઃ । કન્દર્પ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૪ બ્લૂં મન્મથાય નમઃ । મન્મથ શ્રીપાદુકાં પૂજયામિ નમઃ ।
૪ સ્ત્રીં કામદેવાય નમઃ । કામદેવ શ્રીપાદુકાં પૂજયામિ નમઃ ।
(પુષ્પાઞ્જલિં દત્વા)

અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલે ।
ભક્ત્યા સમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥

એતા દેવતાઃ પ્રીતાસ્તર્પિતા ભવન્તુ ।
(પુષ્પાઞ્જલિં દત્વા યોનિ મુદ્રયા પ્રણમેત્ ।

પઞ્ચમાવરણાચનમ્ - (અષ્ટકોણસ્ય પ્રાચ્યાદ્યષ્ટદિક્ષુ ક્રમેણ)
૪. સુભગાયૈ નમઃ । સુભગાશ્રીપાદુકાં પૂજયામિ નમઃ૧ (૦) ।
૪ ભગાયૈ નમઃ । ભગાશ્રીપાદુકાં ૦।
૪ ભગસર્પિણ્યૈ નમઃ । ભગસર્પિણી શ્રીપાદુકાં ૦।
૪ ભગમાલિન્યૈ નમઃ । ભગમાલિનીશ્રીપાદુકાં ૦।
૪. અનઙ્ગાયૈ નમઃ । અનઙ્ગાશ્રીપાદુકાં૦।
૪ અનઙ્ગકુસુમાયૈ નમઃ । અનઙ્ગકુસુમાશ્રીપાદુકાં ૦।
૪. અનઙ્ગમેખલાયૈ નમઃ । અનઙ્ગમેખલાશ્રીપાદુકાં ૦।
૪. અનઙ્ગમદનાયૈ નમઃ । અનઙ્ગમદના શ્રીપાદુકાં ૦।
(પુષ્પાઞ્જલિં દત્વા)
અભીષ્ટ ઇત્યદિ પઞ્ચમાવરણાર્ચનમ્ ।
પુષ્પાઞ્જલિં દત્વા યોનિમુદ્રયા પ્રણમેત્ ।

૧ - ૦ શ્રીપાદુકાં પૂજયામિ ઇતિ સર્વત્રાનુવર્તતે

ષષ્ઠાવરણાચના । (અષ્ટદલમૂલે પ્રાચ્યાદિદિક્ષુ)
૪ આં બ્રાહ્મ્યૈ નમઃ । બ્રાહ્મીશ્રી ૦।
૪ ઈં માહેશ્વર્યૈ નમઃ । માહેશ્વરી શ્રી ૦।
૪ ઊં કૌમાર્યૈ નમઃ । કૌમારી શ્રી ૦।
૪ ૠં વૈષ્ણવ્યૈ નમઃ । વૈષ્ણવીશ્રી ૦।
૪ ૡં વારાહ્યૈ નમઃ । વારાહી શ્રી ૦।
૪ ઐં માહેન્દ્ર્યૈ નમઃ । માહેન્દ્રીશ્રી ૦।
૪ ઔં ચામુણ્ડાયૈ નમઃ । ચામુણ્ડાશ્રી ૦।
૪ અઃ મહાલક્ષ્મ્યૈ નમઃ । મહાલક્ષ્મીશ્રી ૦। (પુષ્પાઞ્જલિં દત્વા)
અભીષ્ટ સિદ્ધિં ઇત્યાદિ + ષષ્ઠમાવરણાર્ચનમ્ ।
પુષ્પાઞ્જલિં દત્વા યોનિમુદ્રયા પ્રણમેત્ ।

સપ્તમાવરણાચનમ્ । (અષ્ટદલાગ્રમધ્યે)
૪. અં અસિતાઙ્ગભૈરવાય નમઃ । અસિતાઙ્ગભૈરવ શ્રી ૦।

૪ ઇં રુરુભૈરવાય નમઃ । રુરુ ભૈરવશ્રી ૦।

૪ ઉં ચણ્ડભૈરવાય નમઃ । ચણ્ડભૈરવ શ્રી ૦।

૪ ઋં ક્રોધભૈરવાય નમઃ । ક્રોધભૈરવ શ્રી ૦।

૪ લૃં ઉન્મત્તભૈરવાય નમઃ । ઉન્મત્તભૈરવ શ્રી ૦।

૪. ઐં કપાલભૈરવાય નમઃ । કપાલભૈરવ શ્રી ૦।

૪. ૐ ભીષણભૈરવાય નમઃ । ભીષણભૈરવ શ્રી ૦।

૪. અં સંહારભૈરવાય નમઃ । સંહારભૈરવ શ્રી ૦।

(પુષ્પાઞ્જલિઃ । અભીષ્ટ + સપ્તમાવરણાર્ચનમ્ ।

(પુષ્પાઞ્જલિઃ) યોનિમુદ્રયા પ્રણમેત્ ॥

અષ્ટમાવરણાચનમ્ । (અષ્ટદલાગ્રે) (પ્રાચ્યાદિ)

૪ કામરૂપપીઠાય નમઃ । કામરૂપપીઠશ્રી ૦।

૪ મલયપીઠાય નમઃ । મલયપીઠ શ્રી ૦।

૪. કોલ્લગિરિપીઠાય નમઃ । કોલ્લગિરિપીઠ શ્રી ૦।

૪. ચૌહારાપીઠાય નમઃ । ચૌહારાપીઠશ્રી ૦।

૪. કુલાન્તકપીઠાય નમઃ । કુલાન્તકપીઠશ્રી ૦।

૪ જાલન્ધરપીઠાય નમઃ । જાલન્ધરપીઠશ્રી ૦।

૪. ઉડ્યાનપીઠાય નમઃ । ઉડ્યાનપીઠશ્રી ૦।

૪. કોટ્ટપીઠાય નમઃ । કોટ્ટપીઠશ્રી ૦।

(પુષ્પાઞ્જલિઃ) । અભીષ્ટસિદ્ધિં ઇત્યાદિ ..... અષ્ટમાવરણાર્ચનમ્ ।

(પુષ્પાઞ્જલિઃ । યોનિમુદ્રયા પ્રણમેત્ ।)

નવમાવરણાર્ચનમ્ ।

(ભૂપુરમધ્યે દશદિક્ષુ)

૪. હેતુકાય નમઃ । હેતુકશ્રી ૦।

૪. ત્રિપુરાન્તકાય નમઃ । ત્રિપુરાન્તકશ્રી ૦।

૪ વેતાલાય નમઃ । વેતાલશ્રીં ૦।

૪ અગ્નિજિહ્વાય નમઃ । અગ્નિજિહ્વશ્રી ૦।

૪ કાલાન્તકાય નમઃ । કાલાન્તકશ્રી ૦।

૪ કપાલાય નમઃ । કપાલશ્રી ૦।

૪ એકાપાદાય નમઃ । એકપાદશ્રી ૦।

૪ ભીમરૂપાય નમઃ । ભીમરૂપશ્રી ૦।

૪ મલયાય નમઃ । મલયશ્રી ૦।

૪ હાટકેશ્વરાય નમઃ । હાટકેશ્વરશ્રી ૦।
પુષ્પાઞ્જલિઃ । અભીષ્ટસિદ્ધિં ઇત્યાદિ નવમાવરણાર્ચનમ્ ।
(પુષ્પાઞ્જલિઃ । યોનિમુદ્રયા પ્રણમેત્ ।)

૧ પ્રાચીશાન્યોર્મધ્યે નવમી અધરા ।
નૈરૃતીવારુણ્યોર્મધ્યે દશમી ઊર્ધ્વા દિક્ ।

દશમાવરણાચનમ્ -
૪ સવજાય ઇન્દ્રાય નમઃ । ઇન્દ્રશ્રીપાદુકાં ૦।
૪ સશક્તયે અગ્રયે નમઃ । અગ્નિશ્રીપાદુકાં૦।
૪ સદણ્ડાય યમાય નમઃ । યમશ્રીપાદુકાં ૦।
૪ સખડ્ગાય નિરૃતયે નમઃ । નિરૃતિશ્રી પાદુકાં ૦।
૪ સપાશાય વરુણાય નમઃ । વરુણશ્રીપાદુકાં ૦।
૪ સધ્વજાય વાયવે નમઃ । વાયુશ્રીપાદુકાં ૦।
સશઙ્ખાય સોમાય નમઃ । સોમશ્રી શ્રીપાદુકાં ૦।
સત્રિશૂલાય ઈશાનાય નમઃ । ઈશાનશ્રી ૦।
(પુષ્પાઞ્જલિઃ) અભીષ્ટ ઇત્યાદિ દશામાવરણાચતમ્ ।
(પુષ્પાઞ્જલિઃ । યોનિમુદ્રયા પ્રણમેત્ ।)

પુષ્પાર્ચના -
૪. હંસઃ શિવઃ સોઽહં ગુરુભ્યો નમઃ ।
૪. સોઽહં હંસઃ શિવઃ પરમગુરુભ્યો નમઃ ।
૪. હંસઃ શિવઃ સોઽહં હંસઃ પરમેષ્ઠિગુરુભ્યો નમઃ ।
૪. હંસઃ સોઽહં પરાત્પરગુરુભ્યો નમઃ ।
૪. શિવાય ગુરવે નમઃ ।
૪. ૐ નમો ભગવતે દક્ષિણામૂર્તયે મહ્યં મેધાં પ્રજ્ઞાં
પ્રયચ્છ સ્વાહા ।
મેધાદક્ષિણામૂર્તયે નમઃ ।
૪ ૐ સમસ્તગુરુમણ્ડલરૂપિણ્યૈ બાલાત્રિપુરસુન્દર્યૈ નમઃ ।

૪. ૐ ગં ગણપતયે નમઃ ।
૪. ૐ દું દુર્ગાયૈ નમઃ ।
૪. ક્ષં ક્ષેત્રપાલકાય નમઃ ।
૪. અં અભયઙ્કરાય નમઃ ।

૪. વાં વાસ્તુપુરુષાય નમઃ ।

૪. યાં યોગિનીભ્યો નમઃ ।

૪. હ્રીં શ્રીં ફટ્ ફં ફાં ફિં ફીં ભૈરવાય નમઃ ।

૪. સં સરસ્વત્યૈ નમઃ ।

૪. કુલદેવતાભ્યો નમઃ ।

૪. ગણાનાં ત્વા ગણપતિꣳ  ઇત્યાદિ સાધનમ્ ।
બ્રહ્મણસ્પતયે ગણપતયે નમઃ ।

૪. ૐ ગં ૐ ગણપતયે નમઃ ।

૪. ૐ વક્રતુણ્ડાય હુમ્ । વક્રતુણ્ડગણપતયે નમઃ ।

૪. ૐ શ્રીં હ્રીં ક્લીં ગ્લૌં ગં ગણપતયે વરવરદ સર્વજનં
 મે વશમાનય સ્વાહા -
 મહાગણપતયે નમઃ ।

૪. ૐ શ્રીં હ્રીં ક્લીં ગ્લૌં કએઈલહ્રીં તત્સવિતુવરેણ્યં ગણપતયે
ક્લીં હસકહલહ્રીં ભર્ગો દેવસ્ય ધીમહિ વરવરદ સૌઃ સકલહ્રીં
શ્રીં ધિયો યો નઃ પ્રચોદયાત્ સર્વજનં મે વશમાનય સ્વાહા -
શ્રીવિદ્યાગણપતયે નમઃ ।

ૐ શ્રીં હ્રીં ક્લીં સુમુખાય નમઃ । એકદન્તાય નમઃ । કપિલાય નમઃ ।
ગજકર્ણકાય નમઃ । લમ્બોદરાય નમઃ । વિકટાય નમઃ । વિઘ્નરાજાય નમઃ ।
વિનાયકાય નમઃ । ધૂમકેતવે નમઃ । ગણાધ્યક્ષાય નમઃ ।
ભાલચન્દ્રાય નમઃ । ગજાનનાય નમઃ । વક્રતુણ્ડાય નમઃ ।
શૂર્પકર્ણાય નમઃ । હેરમ્બાય નમઃ । સ્કન્દપુર્વજાય નમઃ ।

૪ ૐ શં ઓઙ્કારસ્વરૂપાય ઓજોધરાય ઓજસ્વિને નમઃ ।
સંહૃતાય ઇષ્ટચિત્તાત્મને ભાસ્વરૂપાય નમઃ ।
રં ષટ્કોણમધ્યનિલયાય ષટ્કિરીટધરાય શ્રીમતે ષડાધારાય નમઃ ।
હં ષણ્મુખશરજન્મને શુભલક્ષણાય શિખિવાહનાય નમઃ ।
ણં કૃશાનુસમ્ભવાય કવચિને કુક્કુટધ્વજાય નમઃ ।
ભં કન્દર્પકોટિદીપ્યમાનાય દ્વિષડ્બાહવે દ્વાદશાક્ષાય નમઃ ।
વં ખેટધરાય ખડ્ગિને શક્તિહસ્તાય સુબ્રહ્મણ્યાય નમઃ ।

(૪ ૐ હ્રીં શ્રીં ક્લીં ઔં સૌઃ શરવણભવ રવણભવશ
વણભવશર ણભવશરવ ભવશરવણ વશરવણભ

શરવણભવાય નમઃ ।)

(૪. અં આં ઇં ઈં ઉં ઊં ઋ ૠ લૃં લૄં એં ઐં ૐ ઔં અં અઃ

કં ખં ગં ઘં ઙં ચં છં જં ઝં ઞ્ચં ટં ઠં ડં ઢં ણં

તં થં દં ધં નં પં ફં બં ભં મં

યં રં લં વં શં ષં સં હં ળં ક્ષં માતૃકાદેવ્યૈ નમઃ ।

૪ ઐં વદ વદ વાગ્વાદિનિ સ્વાહા । વાગ્વાદિન્યૈ નમઃ ।

૪ તત્સવિતુર્વ- ઇત્યાદિ પ્રચોદયાત્ । ગાયત્ર્યૈ નમઃ ।

૪ ઐં ઉચ્છિષ્ટચાણ્ડાલિ માતઙ્ગિઃ ક્લીં સ્વાહા । માતઙ્ગ્યૈ નમઃ ।

૪ ૐ ઐં હ્રીં શ્રીં ઐં ક્લીં સૌઃ ૐ નમો ભગવતિ રાજમાટઙ્ગીશ્વરિ

સર્વજનમનોહરિ સર્વમુખરઞ્જનિ ક્લીં હ્રીં શ્રીં સર્વરાજવશઙ્કરિ

સર્વજનમનોહરિ સર્વમુખરઞ્જનિ ક્લીં હ્રીં શ્રીં સર્વરાજવશઙ્કરિ

સર્વસ્ત્રીપુરુષવશઙ્કરિ સર્વદુષ્ટમૃગવશઙ્કરિ સર્વસત્ત્વવશઙ્કરિ

સર્વલોકવશઙ્કરિ ત્રૈલોક્યં મે વશમાનય સ્વાહા ।

સૌઃ ક્લીં ઐં શ્રીં હ્રીં ઐં રાજમાતઙ્ગીશ્વર્યૈ નમઃ ।

૪ ૐ ઐં હ્રીં શ્રીં ઐં ગ્લૌં ઐં નમો ભગવતિ વાર્તાલિ વાર્તાલિ

વારાહિ વારાહિ વરાહમુખિ વરાહમુખિ અન્ધે અન્ધિનિ નમઃ ।

રુન્ધે રુન્ધિનિ નમઃ । જમ્ભે જમ્ભિનિ નમઃ । મોહે મોહિનિ નમઃ ।

સ્તમ્ભે સ્તમ્ભિનિ નમઃ । સર્વદુષ્ટપ્રદુષ્ટાનાં સર્વેષાં

સર્વવાક્ચિત્તચક્ષુર્મુખ-

ગતિજિહ્વાસ્તમ્ભનં કુરુ કુરુ શીઘ્રં વશ્યં ઐં ગ્લૌઃ

ઠઃ ઠઃ ઠઃ ઠઃ હું ફટ્ સ્વાહા ।

વારાહ્યૈ નમઃ ।)

(- ૐ શ્રીં હ્રીં ક્લીં ઇન્દ્રાય નમઃ । અગ્નયે નમઃ । યમાય નમઃ ।

નિરૃતયે નમઃ । વરુણાય નમઃ । વાયવે નમઃ । કુબેરાય નમઃ ।

ઈશાનાય નમઃ ।

ૐ શ્રીં હ્રીં ક્લીં બ્રાહ્મ્યૈ નમઃ । માહેશ્વર્યૈ નમઃ । કૌમાર્યૈ નમઃ ।

વૈષ્ણવ્યૈ નમઃ । વારાહ્મૈ નમઃ । માહેન્દ્ર્યૈ નમઃ । ચામુણ્ડાયૈ નમઃ ।

મહાલક્ષ્મ્યૈ નમઃ ।

ૐ શ્રીં હ્રીં ક્લીં ઋદ્ધ્યામોદાભ્યાં નમઃ । સમૃદ્ધિપ્રમોદાભ્યાં નમઃ ।

કાન્તિ સુમુખાભ્યાં નમઃ । મદનાવતીદુર્મુખાભ્યાં નમઃ ।

મદદ્રવા અવિઘ્નાભ્યાં નમઃ । દ્રાવણીવિઘ્નકર્તૃભ્યાં નમઃ ।

વસુધારાશઙ્ખનિધિભ્યાં નમઃ । વસુમતીપદ્મનિધિભ્યાં નમઃ ।

ૐ શ્રીં હ્રીં ક્લીં હૃદયશક્ત્યે નમઃ । શિરશ્શક્ત્યે નમઃ ।
શિખાશક્ત્યે નમઃ । કવચશક્ત્યે નમઃ । નેત્રત્રયશક્ત્યે નમઃ ।
અસ્ત્રશક્ત્યે નમઃ ।
ૐ શ્રીં હ્રીં ક્લીં રમારમાપતિભ્યાં નમઃ । ગિરિજાગિરિજાપતિભ્યાં નમઃ ।
રતિરતિપતિભ્યાં નમઃ । મહીમહીપતિભ્યાં નમઃ ।
મહાલક્ષ્મીમહાગણપતિભ્યાં નમઃ ।
શ્રીમહાગણપતયે નમઃ । શ્રીવિદ્યાગણેશાય નમઃ ।)
૪ ૐ હ્રીં નમઃ શિવાય । શ્રીકામેશ્વરાય નમઃ ।
૪ ૐ હ્રીં નમઃ શિવાયૈ । ૐ હ્રીં નમઃ શિવાય ।
કામેશ્વરીકામેશ્વરાભ્યાં નમઃ ।
૪ ક એ ઈ લ હ્રીં હસકહલહ્રીં સકલહ્રીં શ્રીમ્ । ૐ નમઃ હ્રીં ૐ ।
શિવકામેશ્વરાઙ્કસ્થકામેશ્વર્યૈ નમઃ ।
૪ ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ ૐ હ્રીં શ્રીં ક એ ઈ લ હ્રીં
હસકહલહ્રીં સકલહ્રીં
સૌઃ ઐં ક્લીં હ્રીં શ્રીમ્ । ૐ નમઃ હ્રીં ૐ ।
શિવકામેશ્વરાઙ્કસ્થકામેશ્વર્યૈ નમઃ ।
૪ ૐ ક એ ઈ લ હ્રીં હસકહલ હ્રીં સકલ હ્રીં શ્રીં ઐં ક્લીં સૌઃ
શિવકામેશ્વરાઙ્કસ્થકામેશ્વર્યઙ્કવાસિન્યૈ બાલાયૈ નમઃ ।

૪ ૐ ઐં ક્લીં શ્રીં વષટ્ સૌઃ ક્લીં શ્રીં વૌષટ્ ઐં ક્લીં
શ્રીં સૌઃ ક્લીં ઐં
ૐ આં હ્રીં ક્રોં બાલાત્રિપુરસુન્દરિ પ્રસન્નવાગ્વાદિનિ આશ્રાવય આશ્રાવય
આકર્ષયાકર્ષય । આવાહયાવાહય । માં રક્ષ રક્ષ સૌભાગ્યદાયિનિ
સ્વર્ણાકર્ષણમહાલક્ષ્મિ ધનં દેહિ દેહિ સર્વજનં મે વશમાનય સ્વાહા ।
બાલામ્બાયૈ નમઃ ।
૪ ઐં ક્લીં સૌઃ બાલામ્બાયૈ નમઃ ।
૪ ઐં ક્લીં સૌઃ સૌઃ ક્લીં ઐં બાલામ્બાયૈ નમઃ ।
ૐ ઈં ઈં નમઃ કામકલાયૈ બાલામ્બાયૈ નમઃ ।

અષ્ટોત્તરશતનામાર્ચના
ૐ ઐં હ્રીં શ્રી કલ્યાણ્યૈ નમઃ । ત્રિપુરાયૈ નમઃ । બાલાયૈ નમઃ ।
માયાયૈ નમઃ । ત્રિપુરસુન્દર્યૈ નમઃ । સુન્દર્યૈ નમઃ ।

સર્વસૌભાગ્યવત્યૈ નમઃ । હ્રીઙ્કારરૂપિણ્યૈ નમઃ । ઐઙ્કાર્યૈ નમઃ ।
સર્વજનન્યૈ નમઃ । ક્લીઙ્કાર્યૈ નમઃ । પરમેશ્વર્યૈ નમઃ ।
સૌઃ કાર્યૈ નમઃ । સર્વશક્ત્યાઢ્યાયૈ નમઃ । ત્ર્યક્ષર્યૈ નમઃ ।
દિવ્યગન્ધિન્યૈ નમઃ । સંવિદાનન્દલહર્યૈ નમઃ । શ્રીવિદ્યાયૈ નમઃ ।
ત્રિપુરેશ્વર્યૈ નમઃ । ગુપ્તાયૈ નમઃ । ૨૦॥

ગુપ્તતરાયૈ નમઃ । નિત્યાયૈ નમઃ । નિત્યાષોડશકાવૃતાયૈ નમઃ ।
ભક્તાનુરક્તાયૈ નમઃ । રક્તાઙ્ગ્યૈ નમઃ । શિવાયૈ નમઃ ।
સર્વારુણાયૈ નમઃ । શુભાયૈ નમઃ । મોહિન્યૈ નમઃ । પરમાનન્દાયૈ નમઃ ।
કામેશ્યૈ નમઃ । તરુણ્યૈ નમઃ । કલાયૈ નમઃ । પદ્માવત્યૈ નમઃ ।
ભગવત્યૈ નમઃ । પદ્મરાગકિરીટિન્યૈ નમઃ । રક્તવસ્ત્રાયૈ નમઃ ।
રક્તભૂષાયૈ નમઃ । રક્તગન્ધાનુલેપનાયૈ નમઃ ।
સૌગન્ધિકમિલદ્વેણ્યૈ નમઃ । ૪૦॥

મન્ત્રિણ્યૈ નમઃ । મન્ત્રપુષ્પિણ્યૈ નમઃ । તત્ત્વાસનાયૈ નમઃ ।
તત્ત્વમય્યૈ નમઃ । સિદ્ધાન્તઃપુરવાસિન્યૈ નમઃ । શ્રીવાણીડ્યાયૈ નમઃ ।
મહાદેવ્યૈ નમઃ । કૌલિન્યૈ નમઃ । પરદેવતાયૈ નમઃ ।
કૈવાલ્યરેખાયૈ નમઃ । વશિન્યૈ નમઃ । સર્વેશ્યૈ નમઃ ।
સર્વમઙ્ગલાયૈ નમઃ । નારાયણ્યૈ નમઃ । વેદવેદ્યાયૈ નમઃ ।
સર્વસમ્પત્પ્રદાયૈ નમઃ । સત્યૈ નમઃ । ચતુર્ભુજાયૈ નમઃ ।
ચન્દ્રચૂડાયૈ નમઃ । પુરાણાગમબોધિતાયૈ નમઃ । ૬૦॥

ભૂતેશ્વર્યૈ નમઃ । ભૂતમય્યૈ નમઃ । પઞ્ચાશદ્વર્ણરૂપિણ્યૈ નમઃ ।
સર્વમઙ્ગલમાઙ્ગલ્યાયૈ નમઃ । કામાક્ષ્યૈ નમઃ । કામદાયિન્યૈ નમઃ ।
કિઙ્કરીભૂતગીર્વાણ્યૈ નમઃ । સુધાપાનવિનોદિન્યૈ નમઃ ।
આધારવીથીપથિકાયૈ નમઃ । સ્વાધિષ્ઠાનસમાશ્રિતાયૈ નમઃ ।
મણિપૂરસમાસીનાયૈ નમઃ । અનાહતનિવાસિન્યૈ નમઃ ।
વિશુદ્ધિચક્રનિલયાયૈ નમઃ । આજ્ઞાચક્રનિવાસિન્યૈ નમઃ ।
અષ્ટત્રિંહ્સત્કલામૂર્તયે નમઃ । સુષુમ્નાગારમધ્યગાયૈ નમઃ ।
યોગીશ્વરમુનિધ્યેયાયૈ નમઃ । પરબ્રહ્મસ્વરૂપિણ્યૈ નમઃ ।
દિક્પાલશક્તિસંયુક્તાયૈ નમઃ । સર્વાશાપરિપૂરકાયૈ નમઃ । ૮૦॥

અનઙ્ગકુસુમાદીડ્યાયૈ નમઃ । વાગ્દેવ્યષ્ટકસંવૃતાયૈ નમઃ ।
સર્વસૌભાગ્યદેશાન્યૈ નમઃ । માત્રષ્ટકસમાવૃતાયૈ નમઃ ।

ભૈરવાષ્ટકસંસેવ્યાયૈ નમઃ । સર્વાભીષ્ટાર્થસાધિકાયૈ નમઃ ।
યોગિનીષટ્કસંસેવ્યાયૈ નમઃ । સર્વરક્ષાકરાધિપાયૈ નમઃ ।
રતિપ્રીતિવિજયાખ્યત્રિશક્તિગુરુસેવિતાયૈ નમઃ ।
સર્વસિદ્ધિપ્રદેશાન્યૈ નમઃ । સર્વાનન્દમયાધિપાયૈ નમઃ ।
રહઃ પૂજાસમાલોલાયૈ નમઃ । બિન્દુસ્થલમનોહરાયૈ નમઃ ।
ત્રિકોણમધ્યનિલયાયૈ નમઃ । ષટ્કોણપુરવાસિન્યૈ નમઃ ।
વસુપત્રદ્વયાવાસાયૈ નમઃ । ભૂપુરદ્વયમધ્યગાયૈ નમઃ ।
શિવકામેશ્વરાઙ્ગસ્થકામેશ્વર્યઙ્કવાસિન્યૈ નમઃ ।
કામેશ્વરીસમાકારાયૈ નમઃ । ફુલ્લકલ્હારમધ્યગાયૈ નમઃ । ૧૦૦॥

પુસ્તકાભીતિવરદજપમાલાલસત્કરાયૈ નમઃ । તરુણારુણદેહાભાયૈ નમઃ ।
દિવ્યાભરણભૂષિતાયૈ નમઃ । બન્ધૂકકુસુમપ્રખ્યાયૈ નમઃ ।
બાલલીલાવિનોદિન્યૈ નમઃ । કાશ્મીરકર્દમાલિપ્તતનુચ્છાયાવિરાજિતાયૈ નમઃ ।
સપર્યાઽઽચારનિરતગુરુમણ્ડલસેવિતાયૈ નમઃ ।
ચતુર્વર્ગપ્રદાનોત્કનિત્યકલ્યાણરૂપિણ્યૈ નમઃ । ૧૦૮॥

આવરણાચના૧ ૧આવરણપૂજાકરણાશક્તૌ પુષ્પાર્ચના કર્તું શક્યતે ॥

૪ બાલામ્બાયૈ નમઃ । ૪ ઇન્દ્રશક્ત્યમ્બાયૈ નમઃ । ૪ અગ્નિશક્ત્યમ્બાયૈ નમઃ ।
૪ યમશક્ત્યમ્બાયૈ નમઃ । ૪ નિરૃતિશક્ત્યમ્બાયૈ નમઃ ।
૪ વરુણશક્ત્યમ્બાયૈ નમઃ । ૪ વાયુશક્ત્યમ્બાયૈ નમઃ ।
૪ કુબેરશક્ત્યમ્બાયૈ નમઃ ।
૪ ઈશાનશક્ત્યમ્બાયૈ નમઃ । ૪ સર્વાશાપૂરકચક્રસ્વામિન્યૈ નમઃ ।
૧૦ બાલામ્બાયૈ નમઃ ।
૪ અનઙ્ગકુસુમામ્બાયૈ નમઃ । ૪ અનઙ્ગમેખલામ્બાયૈ નમઃ ।
૪ અનઙ્ગમદનામ્બાયૈ નમઃ । ૪ અનઙ્ગમદનાતુરામ્બાયૈ નમઃ ।
૪ અનઙ્ગરેખામ્બાયૈ નમઃ । ૪ અનઙ્ગવેગિન્યમ્બાયૈ નમઃ ।
૪ અનઙ્ગાઙ્કુશામ્બાયૈ નમઃ । ૪ અનઙ્ગમાલિન્યમ્બાયૈ નમઃ ।
૪ વશિનીવાગ્દેવતામ્બાયૈ નમઃ । ૪ કામેશ્વરીવાગ્દેવતામ્બાયૈ નમઃ ।
૪ મોદિનીવાગ્દેવતામ્બાયૈ નમઃ । વિમલાવાગ્દેવતામ્બાયૈ નમઃ ।
૪ અરુણાવાગ્દેવતામ્બાયૈ નમઃ । ૪ જયિનીવાગ્દેવતામ્બાયૈ નમઃ ।
૪ સર્વેશ્વરીવાગ્દેવતામ્બાયૈ નમઃ । ૪ કૌલિનીવાગ્દેવતામ્બાયૈ નમઃ ।
૪ સર્વસૌભાગ્યદાયકચક્રસ્વામિન્યૈ નમઃ । ૧૦ બાલામ્બાયૈ નમઃ ।
૪ બ્રાહ્મ્યમ્બાયૈ નમઃ । ૪ માહેશ્વર્યમ્બાયૈ નમઃ । ૪ કૌમાર્યમ્બાયૈ નમઃ ।

૪ વૈષ્ણવ્યમ્બાયૈ નમઃ । ૪ વારાહ્યમ્બાયૈ નમઃ । ૪ માહેન્દ્ર્યમ્બાયૈ નમઃ ।
૪ ચામુણ્ડામ્બાયૈ નમઃ । ૪ મહાલક્ષ્મ્યમ્બાયૈ નમઃ ।
૪ અસિતાઙ્ગભૈરવાય નમઃ । ૪ રુરુભૈરવાય નમઃ ।
૪ ચણ્ડભૈરવાય નમઃ । ૪ ક્રોધભૈરવાય નમઃ ।
૪ ઉન્મત્તભૈરવાય નમઃ । ૪. કપાલભૈરવાય નમઃ ।
૪ ભીષણભૈરવાય નમઃ । ૪ સંહારભૈરવાય નમઃ ।
૪ સર્વાર્થસાધકચક્રસ્વામિન્યૈ નમઃ । ૧૦ બાલામ્બાયૈ નમઃ ।

૪ સાકિન્યમ્બાયૈ નમઃ । ૪ રાકિણ્યમ્બાયૈ નમઃ ।
૪ લાકિન્યમ્બાયૈ નમઃ । ૪ કાકિન્યમ્બાયૈ નમઃ ।
૪ ડાકિન્યમ્બાયૈ નમઃ । ૪ હાકિન્યમ્બાયૈ નમઃ ।
૪ યાકિન્યં બાયૈ નમઃ । સર્વક્ષાકરચક્રસ્વામિન્યૈ નમઃ ।
૪ બાલામ્બાયૈ નમઃ । રત્યમ્બાયૈ નમઃ । પ્રીત્યમ્બાયૈ નમઃ ।
૪ વિજયામ્બાયૈ નમઃ । ૪ સર્વસિદ્ધિપ્રદચક્રસ્વામિન્યૈ નમઃ ।
૧૦ બાલામ્બાયૈ નમઃ ।
૪ ઐં હૃદયશક્ત્યમ્બાયૈ નમઃ । ૪ ક્લીં શિરઃશક્ત્યમ્બાયૈ નમઃ ।
૪ સૌઃ શિખાશક્ત્યમ્બાયૈ નમઃ । ૪ ઐં કવચશક્ત્યમ્બાયૈ નમઃ ।
૪ ક્લીં નેત્રત્રયશક્ત્યમ્બાયૈ નમઃ । ૪ સૌઃ અસ્ત્રશક્ત્યમ્બાયૈ નમઃ ।
૧૦ બાલામ્બાયૈ નમઃ ।

૪ ગુરુભ્યો નમઃ । ૪ પરમગુરુભ્યો નમઃ ।
૪ પરમેષ્ઠિગુરુભ્યો નમઃ । ૪ સર્વાનન્દમયચક્રસ્વામિન્યૈ નમઃ ।
૧૦ બાલામ્બાયૈ નમઃ ।

ધૂપઃ

૧૦ લાક્ષાસમ્મિલિતૈઃ સિતાભ્રસહિતૈઃ શ્રીવાસસમ્મિશ્રિતૈઃ
કર્પૂરાકલિતૈઃ શિરૈર્મધુયુતૈર્ગોસર્પિષા લોડિતૈઃ ।
શ્રીકણ્ઠાગરુગુગ્ગુલુપ્રભૃતિર્નાનાવિધૈર્વસ્તુભિઃ ।
ધૂપં તે પરિકલ્પયામિ જનનિ સ્નેહાત્ત્વમઙ્ગીકુરુ ॥

દીપઃ

૧૦ રત્નાલઙ્કૃતહેમપાત્રનિહિતૈર્ગોસર્પિષા લોડિતૈઃ
દીપૈર્દીર્ઘતરાન્ધકારભિદુરૈઃ બાલાર્કકોટિપ્રભૈઃ ।
આતામ્રજ્વલદુજ્જ્વલપ્રવિલસદ્રત્નપ્રદીપૈસ્તથા

માતસ્ત્વામહમાદરાદનુદિનં નીરાજયામ્યુચ્ચકૈઃ ॥

નિવેદનં

૧૦ માતસ્ત્વાં દધિદુગ્ધપાયસમહાશાલ્યન્નસન્તાનિકા -
સૂપાપૂપસિતાઘૃતૈઃ સવટકૈઃ સક્ષૌદ્રરમ્ભાફલૈઃ ।
એલાજીરકહિઙ્ગુનાગરનિશાકુસ્તુમ્ભરીસંસ્કૃતૈઃ
શાકૈઃ સાકમહં સુધાધિકરસૈઃ સન્તર્પયામ્યર્ચયન્ ॥

(દેવ્યગ્રે ચતુરશ્રમણ્ડલં સામાન્યાર્ધ્યં જલેન વિધાય ।
તત્ર યથાસમ્ભવં નૈવેદ્યં નિધાય । ૐ વં ઇતિ ધેનુમુદ્રયા
અમૃતીકૃત્ય ૪ મૂલેન સવ્યાહૃત્યા ગાયત્ર્યા ચ પ્રોક્ષ્ય સત્યં ત્વર્તેન
(ઋતં ત્વા સત્યેન) પરિષિઞ્ચામીતિ પરિષિચ્ય ૪ સપરિવારાયૈ
શ્રીબાલાત્રિપુરસુન્દર્યૈ નૈવેદ્યં કલ્પયામિ । અમૃતોપસ્તરણમસિ ।
વામકરેણ ગ્રાસમુદ્રાં દક્ષકરેણ પ્રાણાદિ પઞ્ચ મુદ્રાશ્ચ દર્શયન્
૪ ઐં પ્રાણાય સ્વાહા ૪. ક્લીં અપાનાય સ્વાહા । ૪. સૌઃ વ્યાનાય સ્વાહા ।
૪. ઐં ક્લીં ઉદાનાય સ્વાહા । ૪. ઐં ક્લીં સૌઃ સમાનાયસ્વાહા ।
૪. બ્રહ્મણે સ્વાહા । ૧૦. સર્વતત્ત્વવ્યાપિકા બાલા ત્રિપુરસુન્દરી તૃપ્યતુ ।
મધુ વાતા ઋતાય તે મધુ ક્ષરન્તિ સિન્ધવઃ । માધ્વીર્નઃ સન્ત્વોષધીઃ ।
મધુ નક્તમુતોષસિ મધુમત્પાર્થિવઁ રજઃ । મધુ દ્યૌરસ્તુ નઃ પિતા ।
મધુમાન્નો વનસ્પતિર્મધુમાઁ અસ્તુ સૂર્યઃ । માધ્વીર્ગાવો ભવન્તુ નઃ ।
ઇતિ પુષ્પાઞ્જલિં વિધાય । ભુઞ્જાનાં દેવીં ધ્યાયેત્ ।

સાપૂપસૂપદધિદુગ્ધસુધાઘૃતાનિ
સુસ્વાદુભક્તપરમાન્નપુરસ્સરાણિ ।
શાકોલ્લસન્મરિચજીરકબાહ્લિકાનિ
ભક્ષ્યાણિ ભુઙ્ક્ષ્વ જગદમ્બ મયાર્પિતાનિ ॥

ક્ષીરમેતદિદમુત્તમોત્તમં પ્રાજ્યમાજ્યમિદમુજ્જ્વલં મધુ ।
માતરેતદમૃતોપમં પયઃ સમ્ભ્રમેણ પરિપીયતાં મુહુઃ ॥

અતિશીતમુશીરવાસિતં તપનીયે કલશે નિવેશિતમ્ ।
પટપૂતમિદં જિતામૃતં શુચિ ગઙ્ગાજલમમ્બ પીયતામ્ ॥

(દેવીં ભુક્તવતીં ધ્યાત્વા) અમૃતાપિધાનમસિ (ઇતિ ઉત્તરાપોશનં દદ્યાત્ ।)
ઉષ્ણોદકૈઃ પાણિયુગં મુખં ચ પ્રક્ષાલ્ય માતઃ કલધૌતપાત્રે ।
કર્પૂરમિશ્રેણ સકુઙ્કુમેન હસ્તૌ સમુદ્વર્તય ચન્દનેન ॥

જમ્બ્વામ્રરમ્ભાફલસંયુતાનિ દ્રાક્ષાફલક્ષૌદ્રસમન્વિતાનિ ।
સનારિકેલાનિ સદાડિમાનિ ફલાનિ તે દેવિ સમર્પયામિ ॥

તામ્બૂલસમર્પણં
 ૧૦. એલાલવઙ્ગાદિસમન્વિતાનિ તક્કોલકર્પૂરવિમિશ્રિતાનિ ।
તામ્બૂલવલ્લીદલસંયુતાનિ પૂગાનિ તે દેવિ સમર્પયામિ ॥

કર્પૂરનીરાજનં
 ૧૦. સવિનયમથ દત્વા જાનુયુગ્મં ધરણ્યાં
સપદિ શિરસિ ધૃત્વા પાત્રમારાર્તિકસ્ય ।
મુખકમલસમીપે તેઽમ્બ સાર્ધત્રિવારં
ભ્રમયતિ મયિ ભૂયાત્તે કૃપાર્દ્રઃ કટાક્ષઃ ॥

સ્વર્ણ -મન્ત્રપુષ્પાઞ્જલિઃ -ઉપચારાઃ
 ૧૦. અથ બહુમણિમિશ્રૈઃ મૌક્તિકૈસ્ત્વાં વિકીર્ય
ત્રિભુવનકમનીયૈઃ પૂજયિત્વા ચ વસ્ત્રૈઃ ।
મિલિતવિવિધમુક્તાં દિવ્યમાણિક્યયુક્તાં
જનનિ કનકવૃષ્ટિં દક્ષિણાં તેઽર્પયામિ ॥

 ૧૦. તવ દેવિ ગુણાનુવર્ણને ચતુરા નો ચતુરાનનાદયઃ ।
તદિહૈકમુખેષુ જન્તુષુ સ્તવનં કસ્તવ કર્તુમીશ્વરઃ ॥

 ૧૦. પદે પદે યત્પરિપૂજકેભ્યઃ સદ્યોઽશ્વમેધાદિ ફલં દદાતિ ।
તત્સર્વપાપક્ષયહેતુભૂતં પ્રદક્ષિણં તે પરિતઃ કરોમિ ॥

 ૧૦. રક્તોત્પલારક્તલતાપ્રભાભ્યાં ધ્વજોર્ધ્વરેખાકુલિશાઙ્કિતાભ્યાં
અશેષવૃન્દારકવન્દિતાભ્યાં નમો ભવાનીપદપઙ્કજાભ્યામ્ ॥

 ૧૦. ચરણનલિનયુગ્મં પઙ્કજૈઃ પૂજયિત્વા
કનકકમલમાલાં કણ્ઠદેશેઽર્પયિત્વા ।
શિરસિ વિનિહિતોઽયં રત્નપુષ્પાઞ્જલિસ્તે
હૃદયકમલમધ્યે દેવિ હર્ષં તનોતુ ॥

અથ મણિમયમઞ્ચકાભિરામે કનકમયવિતાનરાજમાને ।
પ્રસરદગરુધૂપધૂપિતેઽસ્મિન્ ભગવતિ ભવનેઽસ્તુ તે નિવાસઃ ॥

એતસ્મિન્મણિખચિતે સુવર્ણપીઠે ત્રૈલોક્યાભયવરદૌ નિધાય હસ્તૌ ।
વિસ્તીર્ણે મૃદુલતરોત્તરચ્છદેઽસ્મિન્ પર્યઙ્કે કનકમયે નિષીદ માતઃ ॥

ક્ષણમથ જગદમ્બ મઞ્ચકેઽસ્મિન્ મૃદુતરતૂલિકયા વિરાજમાને ।
અતિરહસિ મુદા ભૃતાન્તરઙ્ગા સુખશયનં કુરુ તત્ર માં સ્મરન્તી ॥

પૂજાસમર્પણં
૧૦ મુક્તાકુન્દેન્દુગૌરાં મણિમયમકુટાં રત્નતાટઙ્કયુક્તાં
અક્ષસ્રક્પુસ્તહસ્તામભયવરકરાં ચન્દ્રચૂડાં ત્રિણેત્રામ્ ।
નાનાલઙ્કારયુક્તાં સુરમકુટમણિદ્યોતિતસ્વર્ણપીઠાં
સાનન્દાં સુપ્રસન્નાં ત્રિભુવનજનનીં ચેતસા ચિન્તયામિ ॥

૧૦. એષા ભક્ત્યા તવ વિરચિતા યા મયા દેવિ પૂજા
સ્વીકૃત્યૈનાં સપદિ સકલાન્મેઽપરાધાન્ ક્ષમસ્વ ।
ન્યૂનં યત્તત્તવ કરુણાયા પૂર્ણતામેતુ સદ્યઃ
સાનન્દં મે હૃદયકમલે તેઽસ્તુ નિત્યં નિવાસઃ ॥

૭. શ્રીબાલા ત્રિપુરસુન્દરીપાર્ષદેભ્યો નમઃ । બલિમુપહારયામિ ।

—- પૂજાસમાપનં
વક્રતુણ્ડાદીનાં મન્ત્રાણાં પુનઃ ષડઙ્ગન્યાસઃ દિગ્બન્ધઃ ।
ધ્યાનમ્ । મન્ત્રજપો યથાવકાશમ્ । ઉત્તરાઙ્ગ ષડઙ્ગન્યાસઃ ।
દિગ્વિમોકઃ । લમિત્યાદિ પઞ્ચપૂજા । જપસમર્પણમ્ ।
સાધુ વાઽસાધુ વા કર્મ યદ્યદાચરિતં મયા ।
તત્સર્વં કૃપયા દેવિ ગૃહાણારાધનં મમ ॥

ઇતિ દેવ્યા વામહસ્તે પૂજાં સમર્પ્ય ।
શઙ્ખમુદ્ધૃત્ય દેવ્યપુરિ ત્રિઃ પરિભ્રામ્ય ।
તજ્જલં આત્માનં સમવેતાંશ્ચ પ્રોક્ષ્ય । શઙ્ખં પ્રક્ષાલ્ય નિદધ્યાત્ ।
જ્ઞાનતોઽજ્ઞાનતો વાપિ યન્મયાઽઽચરિતં શિવે ।
બાલકૃત્યમિતિ જ્ઞાત્વા ક્ષમસ્વ પરમેશ્વરિ ॥

સર્વા આવર દેવતાઃ દેવ્યઙ્ગે વિલીનાઃ ભાવયે । દેવી જ્યોતિર્મયી
ચિન્મયી વિભાતિ । લમ્બીજા પૃથિવી ગન્ધં સમર્પયતિ । હમ્બીજ
આકાશઃ પુષ્પાણિ સમર્પયતિ । યં બીજો વાયુર્ધૂપમાઘ્રાપયતિ ।
રમ્બીજોઽગ્નિર્દીપં દર્શયતિ । વમ્બીજો વરુણોઽમૃતોપહારં
નિવેદયતિ । દેવ્યાઃ પાદતલે નિવિષ્ટઃ પુષ્પાઞ્જલિં સમર્પયામિ ।
દેવીં સંવિન્મયીં હૃદયં નયામિ । (ખેચર્યા) સંવિદાત્મરૂપિણીં
ભાવયે । વિશેષાર્ઘ્યપાત્રં મૂલેન આમસ્તકમુદ્ધૃત્ય તત્ક્ષીરં

પાત્રાન્તરેણ આદાય આર્દ્રં જ્વલતીતિ મન્ત્રેણ આત્મનઃ કુણ્ડલિન્યગ્નૌ હુતં ભાવયેત્ । મૂલેન તીર્થનિર્માલ્યે સ્વીકુર્યાત્ । ૐ તત્સદ્બ્રહ્માર્પણમસ્તુ ॥

ઇતિ શ્રીબાલાબાહ્યપૂજાવિધિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Bala Bahyapuja Vidhi*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*